Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 6 | ISSN : 2582-0095

# वाचस्पति मण्डनपृष्ठसेवी



**डॉ.दिनेशकुमारझा**
**ग्रा.पो. अंधराठाढी, जि. मधुबनी,**
**बिहार, भारत।**

**सारांशः –** वाचस्पतिमिश्रः भामत्यां वाक्यमेतत् उद्धृतस्य प्रदर्शयति। अतः परिज्ञायते यत् वाचस्पतिमिश्रः मण्डनमिश्रस्य व्याख्याकारो न अपि तु समीक्षक इति। पद्मपादविरचितात् विवरणप्रस्थानात् भामतीप्रस्थानस्य विभिन्नता स्पष्टमवगम्यते। विवरणप्रस्थानं श्रवणविधिं मनुते। भामतीप्रस्थानं विधिं नाङ्गीकरोति। पद्मपादस्य मते जीवः ईश्वरस्य प्रतिबिम्बः वाचस्पतिमते तु जीवः ब्रह्मणः अवच्छेदः। विवरणकारः ईश्वरं जगतः कारणं निर्दिशति भामतीकारस्तु ब्रह्म जगत्कारणमिति। मनसः इन्द्रियत्वं सर्वैरपि दर्शनकारैर्निगदितं पद्मपादो नाङ्गीकरोति, वाचस्पतिमिश्रस्त्वङ्गीकरोति।

**मुख्यशब्दः –** वाचस्पतिमिश्रः, मण्डनपृष्ठसेवी, ईश्वरः, जगतः, कारणः।

---

सकलविद्यानिष्णातः बहुग्रन्थरचयिता वाचस्पतिमिश्रः न्यायशास्त्रे न्यायसूचीनिबन्ध-न्यायवार्त्तिकतात्पर्यटीकामिति ग्रन्थद्वयस्य सांख्यदर्शने सांख्यकारिकाटीकायाः तत्त्वकौमुद्या योगदर्शने पातंजलयोग सूत्रोपरि व्यासभाष्यस्य तत्त्ववैशारदीति टीकायाः पूर्वमीमांसायां तत्त्वबिन्दुनाम्नः प्रकरणग्रन्थस्य तथा मण्डनमिश्रविरचितस्य विधिविवेकग्रनथस्य न्यायकणिकानाम्न्याः टीकायाः कर्त्ता वाक्यपतिरेवेति तद्ग्रन्थरत्ननिरीक्षणेन सुस्पष्टमपगम्यते। एवं नानाशास्त्रेष्वप्रतिमप्रतिभासम्पन्नोऽप्ययं मेधावी स्वज्ञानपरिणतेः निदर्शनायमानं भामतीनामानं शाङ्करभाष्य व्याख्यानमारच्य अद्वैतसिद्धान्तविषये विद्योतमानां स्वीयां श्रद्धामाविष्कुर्वन् ब्रह्मतत्त्वपरिज्ञानोपयोगितया जिज्ञासुमतीरुद्दीपयामास। मण्डनमिश्रकृतायाः ब्रह्मसिद्धेरुपरि ब्रह्मतत्त्वसमीक्षानामकं ग्रन्थामारचयताऽनेन मण्डनमतानुगामित्वं प्रकटितम्।

समस्तमपि स्वीयं ज्ञानफलं परमेश्वरार्पणं विद्धत् कवयति-

> **यन्ययकाणिकातत्त्वसमीक्षातत्त्वबिन्दुभिः**
>
> **यन्यायसांख्ययोगानां वेदान्तानां निबन्धनैः।।**
>
> **समचैषं महत्पुण्यं तत्फलं पुष्कलम्मया।**
>
> **समर्पितमथैतेन प्रीयतां परमेश्वरः।।** भामती।

श्रीमान् वाचस्पतिमिश्रो भामतीनामानं ग्रन्थं प्रणिनाय, यः खलु न केवलं व्याख्याग्रन्थः अपि तु अद्वैतवेदान्तस्य सम्प्रदायसंस्थापकः भामतीप्रस्थानप्रवर्तकश्च विराजते। वाचस्पतिः मण्डनमिश्रमतमङ्गीकुर्वाणः पद्मपादकृतात् विवरणप्रस्थानात् मतभेदं प्रदर्शयति। तद्वदति भामत्याः कल्पतरुकारः अमलान्दसरस्वतीपंचपादीकृतस्तु वाजसनेयिवाक्यस्यापि आत्मोपक्रमत्वलाभे किं शास्त्रन्तरलोचनयेति पश्यन्तः पुरुषमनूद्य वैश्वानरत्वं विधेयामिति व्याचक्षते तद्दूषयति।

एवं वाचस्पतिमिश्रेण विहितं पद्मपादकृतपंचपादिकाग्रन्थस्य खण्डनं प्रसिद्धमपि पद्मपादानुयायिना प्रकाशात्मना विवरणे भामतीप्रस्थानस्य महत्खण्डनमारचितम्। स वदति– वाचस्पतिस्तु मण्डनपृष्ठसेवी सूत्रभाष्यार्थानभिज्ञः (प्रकटार्थविवरणम्) इति।

किन्तु वाचस्पतिमिश्रः मण्डनमिश्रस्यापि मतं तत्र तत्र तिरस्कुर्वन् दृश्यते, तद्यथा– वाचस्पतिमिरः जीवन्मुक्तिमङ्गीकुर्वाणः तस्या केवलं साधकत्वं वदतो मण्डनमिश्रस्य मतं मण्डयति– स्थितप्रज्ञश्च न साधकः तस्य उत्तरोत्तरध्यानोत्कर्षेण पूर्वप्रत्ययानवस्थिततत्वात्। निरतिशयस्तु स्थितप्रज्ञः। स च सिद्ध एव। (भामती)

मण्डनपृष्ठसेवी सन्नपि वाचस्पतिमिश्रः तन्मतानि बहूनि समर्थयामास।

वाचस्पतिरपि मण्डनमिश्र इव जीवम् अविद्यायाः आश्रयं मनुते।

**जीवस्थाया अविद्याया विषयं ब्रह्मशुक्तिवत्।**

**ऊचे वाचस्पतिर्भाष्यश्रुत्योर्हृदयवेदिता।।**[1]

मण्डन इवायमपि शब्दजन्यं ज्ञानं परोक्षं मनुतेनिर्विचिकित्सवाक्यार्थभावनापरिपाकाहितमन्तः करणं त्वं पदार्थस्य अपरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थताम् अनुभावयति (भामती 1.1.1)।

कल्पतरुकारोऽप्येनमेवाशयं विशदयति–

**वेदान्तवाक्यजज्ञानभावनाजाऽपरोक्षधीः।**

**मूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यते।।**

असत्यात् सत्यप्रतीतिरिति मण्डनमिश्रः ब्रह्मसिद्धौ स्पष्टीकरोति चेत् वाचस्पतिमिश्रोऽपि तदेवाङ्गीकरोति। यथा मलिनात् निर्मलं जलमानयति तथा अज्ञानात् ज्ञानोत्पत्तिरिति तदाशयः।

निषेधार्थकानां वेदान्तवाक्यानां तात्पर्यं ब्रह्मपरकमिति मण्डनमिश्रः सूचयति–

**आम्नायस्य प्रसिद्धं च कवयोऽस्य प्रचक्षते।**

**भेदप्रपंचविलयद्वारेण च निरूपणम्।।**

---

[1] भामती, कल्पतरु 1.4.11

वाचस्पतिमिश्रः भामत्यां वाक्यमेतत् उद्धृतस्य प्रदर्शयति। अतः परिज्ञायते यत् वाचस्पतिमिश्रः मण्डनमिश्रस्य व्याख्याकारो न अपि तु समीक्षक इति। पद्मपादविरचितात् विवरणप्रस्थानात् भामतीप्रस्थानस्य विभिन्नता स्पष्टमवगम्यते। विवरणप्रस्थानं श्रवणविधिं मनुते। भामतीप्रस्थानं विधिं नाङ्गीकरोति। पद्मपादस्य मते जीवः ईश्वरस्य प्रतिबिम्बः वाचस्पतिमते तु जीवः ब्रह्मणः अवच्छेदः। विवरणकारः ईश्वरं जगतः कारणं निर्दिशति भामतीकारस्तु ब्रह्म जगत्कारणमिति। मनसः इन्द्रियत्वं सर्वैरपि दर्शनकारैर्निगदितं पद्मपादो नाङ्गीकरोति, वाचस्पतिमिश्रस्त्वङ्गीकरोति।

प्रथमस्य मतम् एकजीववादः द्वितीयस्य नानाजीववादः। वाचस्पतिमिश्रः बहुविद्याविदपि संस्तवनीयविनयसम्पन्नः स्वीयां भामतीव्याख्यां शङ्करवाग्गङ्गारूपायां गङ्गायां पवित्रितां मनुते। अद्वैतप्रस्थानसमुद्धरणे शङ्कराचार्यात् परम अत्यधिकं योगदानं वाचस्पतिनैव विहितम्।

तथापि शङ्करवाचस्पतिमिश्रयोः मतयोः कश्चन भेदो दृश्यते–

**स्वशक्त्या नटवद् ब्रह्मकारणं शङ्करोऽब्रवीत्।**

**जीवभ्रान्तिनिमित्तं तद्बभाषे भामतीपतिः।।**

**अज्ञातं नटवद्ब्रह्मकारणं शङ्करोऽब्रवीत्।**

**जीवज्ञानं जगद्बीजं जगौ वाचस्पतिस्तथा।।** (कल्पतरु पृ. 471)

**सन्दर्भ ग्रन्थ सूची-**


1. ब्रह्मसूत्रशाङ्करभाष्यम्– श्रीवाचस्पतिमिश्रप्रणीत, 'भामती' चौखम्बा विद्याभवन, वाराणसी।
2. भामती कल्परुटीका– अमलानन्द सरस्वती, बम्बईनिर्णय सागर प्रेस।
3. भामती परिमलटीका– अप्पय्यदीक्षित, बम्बई निर्णय सागर प्रेस।
4. मण्डनमिश्र और उनका अद्वैत वेदान्त– पं.सहदेवझा, मण्डन सन्तति महिषी सहरसा, बिहार।